# ह.वि.शि.बो. अभ्यासप्रश्नपत्रम् (मार्च-2024)
# विषय : संस्कृतम्

**कक्षा - द्वादशी** **कोड न. - 526**

**SET : B**

रोल नं० | | | | | | | | | | |

समयः - होरात्रयम् ] [ पूर्णाङ्काः - 80

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 9 तथा प्रश्न 14 हैं।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गये कोड नम्बर तथा सेट को छात्र उत्तर पुस्तिका के मुख्य पृष्ठ पर लिखें।
- कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमाङ्क अवश्य लिखें।
- उत्तर-पुस्तिका के बीच में खाली पन्ना / पन्नें न छोड़ें।
- उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।
- परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।
- कृपया प्रश्नों के उत्तर देनें से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।**

---

- **सामान्यनिर्देशाः :–**

  I. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
  II. प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
  III. श्रेष्ठाङ्कान् प्राप्तये सुस्पष्टः लेखः लेखनीयः।

- **अस्मिन् प्रश्नपत्रे पञ्च खण्डाः सन्ति :–**

| | | |
|---|---|---|
| खण्डः 'क' | अपठित-अवबोधनम् | - 10 अङ्काः |
| खण्डः 'ख' | रचनात्मक-कार्यम् | - 18 अङ्काः |
| खण्डः 'ग' | पठित-अवबोधनम् | - 30 अङ्काः |
| खण्डः 'घ' | अनुप्रयुक्त-व्याकरणम् | - 06 अङ्काः |
| खण्डः 'ङ' | पाठाधारिताः बहुविकल्पीयाः प्रश्नाः | - 16 अङ्काः |

Downloaded from cclchapter.com

## खण्डः 'क'

# अपठित-अवबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि यथानिर्देशं संस्कृतेन लिखत - 10

आसीत् धारानगर्यां भोजो नाम राजा। सिंहासनम् अधिष्ठितः सः सुप्रबन्धं स्वराज्यं समृद्धमकरोत् । तस्य राज्ये विद्यार्थिनः विद्याभ्यासम्, विद्वांसः च अध्यापनं कुर्वन्ति स्म । धनिनः विपत्तौ निर्धनानां साहाय्यं कुर्वन्ति स्म । भोजः एतादृशः गुणग्राही आसीत् यत् यः कोऽपि विद्वान् राजसदसि स्वकीयां कवितां नवीनम् आविष्कारं वा प्रस्तौति स्म तस्मै भूयांसं पुरस्कारम् अयच्छत् ।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2×1=2

(क) भोजो नाम राजा कुत्र आसीत् ?
(ख) धनिनः केषां सहायतां कुर्वन्ति स्म?
(ग) भोजः किं समृद्धम् अकरोत् ?

(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2×2=4

(क) भोजस्य राज्ये के विद्याभ्यासं कुर्वन्ति स्म ?

(ख) भोजः कस्मै भूयांसं पुरस्कारम् अयच्छत् ?

(ग) भोजस्य राज्ये के अध्यापनं कुर्वन्ति स्म ?

(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । 1

(द) यथानिर्देशम् उत्तरत- ( केवलं प्रश्नत्रयम् ) 3×1=3

(i) 'कोऽपि' इत्यस्य कः सन्धिच्छेदः?
(क) कः + अपि (ख) को + ऽपि
(ग) को + अपि (घ) कः + ऽपि

(ii) अस्मिन् गद्यांशे 'कुप्रबन्धम्' इत्यस्य शब्दस्य कृते किं विलोमपदं प्रयुक्तम्?
(क) स्वराज्यम् (ख) समृद्धम्
(ग) निर्धनम् (घ) सुप्रबन्धम्

(iii) 'अधिष्ठितः' इत्यत्र कः प्रत्ययः?
(क) ष्ठितः (ख) क्त्वा
(ग) क्त (घ) ल्यप्

(iv) 'भूयांसम्' इत्यस्य विशेष्यपदं किम्?
(क) पुरस्कारम् (ख) अयच्छत्
(ग) नवीनम् (घ) कविताम्

Downloaded from cclchapter.com

## खण्डः 'ख'

# रचनात्मक-कार्यम्

2. विषयमेकमधिकृत्य षड्वाक्यानि संस्कृतभाषया लिखत - 6

(क) अनुशासनम्

(ख) स्वच्छतायाः महत्त्वम्

(ग) संस्कृतभाषायाः महत्त्वम्

(घ) मम प्रियः कविः

### (छन्द-अलङ्कार-परिचयः)

3. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत- (केवलं प्रश्नत्रयम्) 2×3=6

(क) वंशस्थछन्दसः लक्षणं किम्?

(ख) उपेन्द्रवज्रा-छन्दसः उदाहरणं किम्?

(ग) वसन्ततिलकाछन्दसि कति वर्णाः भवन्ति?

(घ) रसैः रुद्रैश्छिन्ना यमनसभलागः ......................। (लक्षणस्य रिक्तस्थानपूर्तिं कुरुत)

4. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत - (केवलं प्रश्नत्रयम्) 2×3=6

(क) अतिश्योक्ति-अलङ्कारस्य लक्षणं किम्?

(ख) श्लेषस्य अलङ्कारस्य उदाहरणं किम्?

(ग) उत्प्रेक्षायाः अलङ्कारस्य लक्षणं किम्?

(घ) सत्यर्थे पृथगर्थायाः ..........................।

क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते।। (लक्षणस्य रिक्तस्थानपूर्तिं कुरुत)

## खण्डः 'ग'

# पठित-अवबोधनम्

5. अधोलिखितपद्यांशस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते।
ततो भूय इव ते तमो य उ विद्यायां रताः।।

Downloaded from cclchapter.com

**अथवा**

केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः,
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते,
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्।।

6. अधोलिखितगद्यांशस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

लवः : ननु मूर्खाः! पठितमेव हि युष्माभिरपि तत्काण्डम्। किं न पश्यथ? प्रत्येकं शतसंख्याः कवचिनो दण्डिनो निषङ्गिणश्च रक्षितारः। यदि च विप्रत्ययस्तत्पृच्छत।

बटवः : भो भोः! किं प्रयोजनोऽयमश्वः परिवृतः पर्यटति?

**अथवा**

गर्भेश्वरत्वमभिनवयौवनत्वम् , अप्रतिमरुपत्वममानुषशक्तित्वञ्चेति महतीयं खल्वनर्थ-परम्परा। यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालन-निर्मलापि कालुष्यमुपयाति बुद्धिः। नाशयति च पुरुषमत्यासङ्गो विषयेषु।

7. अधोलिखितासु सूक्तिषु मात्रद्वयोः सूक्त्योः भावार्थं हिन्दीभाषया लिखत - 2×2=4

(क) अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ।

(ख) सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।

(ग) माभूत्परीवादनवावतारः।

(घ) यो यस्य मित्रं न हि तस्य दूरम्।

**अथवा**

अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः उचितपदानि चित्वा पूरयत - 4×1=4

योऽयमश्वः पताकेयमथवा वीरघोषणा।
सप्तलोकैकवीरस्य दशकण्ठकुलद्विषः।।

**अन्वयः :-**

अयं यः 1) .............. (अस्ति) इयं सप्तलोकैक 2) ...................... दशकण्ठ 3) ..................

(च) पताका अथवा 4) ..................... (अस्ति)।

**मञ्जूषा**

| |
|---|
| कुलद्विषः, वीरघोषणा, वीरस्य, अश्वः |

Downloaded from cclchapter.com

8. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि श्लोकात् चित्वा संस्कृतभाषया पूर्णवाक्येन लिखत - (केवलं प्रश्नत्रयम्) 3×1=3

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।।

**प्रश्नाः -**

(क) शतं समाः कथं जिजीविषेत् ?

(ख) 'अस्ति' इत्यस्मिन् पदे कः लकारः?

(ग) 'कर्माणि' इति पदं कस्मिन् वचने अस्ति?

(घ) 'नान्यथा' इत्यस्य पदस्य सन्धिच्छेदं कुरुत।

9. अधोलिखितं गद्याशं पठित्वा प्रश्नानां उत्तराणि गद्यांशात् चित्वा संस्कृतभाषया पूर्णवाक्येन लिखत - (केवलं प्रश्नत्रयम्) 3×1=3

इत्येवं विचार्य सर्वस्वदक्षिणं यज्ञं कर्त्तुमुपक्रान्तवान्। ततः शिल्पिभिरतीव मनोहरो मण्डपः कारितः। सर्वापि यज्ञसामग्री समहृता। देवमुनिगन्धर्वयक्षसिद्धादयश्च समाहूताः।

(क) यज्ञे के के समाहूताः?

(ख) काभिः मनोहरो मण्डपः कारितः?

(ग) 'इत्येवम्' इत्यस्मिन् पदे कः सन्धिः ?

(घ) 'ततः' इत्यस्मिन् पदे कः प्रत्ययः?

10. कोष्ठकाद् उपयुक्तशब्दं चित्वा रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नचतुष्टयम्)

4×1=4

| | |
|---|---|
| (क) <u>श्रीदासः</u> तत्पत्रमुद्घाटितवान्। | (कः / कम्) |
| (ख) अतिजवेन दूर्मतिक्रान्तः सः <u>चपलः</u> दृश्यते। | (कः / कीदृशः) |
| (ग) कौत्सः <u>वरतन्तोः</u> शिष्यः आसीत्। | (केन / कस्य) |
| (घ) अविद्यया <u>मृत्युं</u> तरति। | (कस्मिन् / किम्) |
| (ङ) <u>शुकनासः</u> चन्द्रापीडम् उपदिशति। | (कः / कम्) |

Downloaded from cclchapter.com

## (संस्कृत-साहित्य-परिचयः)

11. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया एकपदेन लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(क) ईशावास्योपनिषद् कस्याः संहितायाः भागः?

(ख) उत्कृष्टं रामस्य चरितं यस्मिन् तत् किम्?

(ग) 'रघुकौत्ससंवादः' अयं पाठः कस्मात् महाकाव्यात् सङ्कलितः?

(घ) श्रीमद्भगवद्गीतायां कति अध्यायाः सन्ति?

(ङ) 'सिंहासनद्वात्रिंशिका' पाठेऽस्मिन् वर्णितसिंहासनः कस्य राज्ञः आसीत्?

12. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया एकपदेन लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(क) रघुवंशमहाकाव्यस्य रचयिता कः?

(ख) 'उत्तररामचरितम्' अयं ग्रन्थः कस्य सर्वोत्कृष्टा रचना?

(ग) 'पाषाणीकन्या' कथासंग्रहस्य संस्कृतभाषायामनुवादः केन महोदयेन कृतम्?

(घ) शिशुपालवधमहाकाव्ये कति सर्गाः सन्ति?

(ड.) 'किरातार्जुनीयम्' महाकाव्येऽस्मिन् कति सर्गाः सन्ति?

## खण्डः – 'घ'

## अनुप्रयुक्त-व्याकरणम्

13. (क) स्वरसन्धेः अथवा व्यञ्जनसन्धेः परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(ख) अव्ययीभावसमासस्य अथवा बहुव्रीहिसमासस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(घ) सम्बन्धकारकस्य अथवा अपादानकारकस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

Downloaded from cclchapter.com

## खण्डः – 'ङ'

## पाठाधारिताः बहुविकल्पीयाः प्रश्नाः

14. अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्तवैकल्पिकचतुर्भ्यः उत्तरेभ्यः एकं शुद्धम् उत्तरं चित्वा लिखत - 16×1=16

1) 'अन्यथेतः' इत्यस्य शब्दस्य कः सन्धिच्छेदः?

   क) अन्यथा + ईतः ख) अन्यथ + इतः

   ग) अन्यथा + इतः घ) अन्य + थेतः

2) 'गर्भेश्वरत्वम्' इत्यस्मिन् शब्दे कः सन्धिः?

   क) गुणसन्धिः ख) व्यञ्जनसन्धिः

   ग) अयादिसन्धिः घ) वृद्धिसन्धिः

3) 'चन्द्र + उज्ज्वलाः' इत्यस्य सन्धियुक्तं पदं किम्?

   क) चन्द्रोज्ज्वलाः ख) चन्द्रोज्ज्वला

   ग) चन्द्रज्ज्वलाः घ) चन्द्रोज्वलाः

4) 'मृण्मयम्' इत्यस्मिन् शब्दे कः प्रत्ययः?

   क) ष्यञ् ख) ल्यप्

   ग) ईयसुन घ) मयट्

5) 'पठन्' इत्यस्मिन् शब्दे कः प्रत्ययः?

   क) मान् ख) क्तवतु

   ग) शतृ घ) शानच्

6) 'वि+अति+क्रम्+ल्यप्' एतेषु संयोगे किं रूपं भवति?

   क) व्यतिक्रमय ख) व्यतिक्रम्य

   ग) व्यातिक्रम्य घ) अतिक्रम्य

7) 'अहर्निशम्' इत्यस्मिन् शब्दे कः समासः?

   क) तत्पुरुषः ख) द्वन्द्वः

   ग) अव्ययीभावसमासः घ) बहुव्रीहिः

8) 'पर्वतश्रणी' इत्यस्य शब्दस्य कः विग्रहः?

   क) पर्वतस्य श्रेणीः ख) पर्वतेषु श्रेणीः

   ग) पर्वतैः श्रेणीः घ) पर्वतानां श्रेणीः

Downloaded from cclchapter.com

9) 'धनाय आदेशः तेन' अत्र समस्तपदम् किम्?

क) धनादेशः　　ख) धनादेश

ग) धनदेशः　　घ) धनायदेशः

10) 'सुमेरोः' इत्यस्मिन् शब्दे का विभक्तिः?

क) तृतीया　　ख) चतुर्थी

ग) पञ्चमी　　घ) षष्ठी

11) 'युज्यस्व' इत्यस्मिन् शब्दे कः लकारः?

क) लट् लकारः　　ख) लृट् लकारः

ग) लोट् लकारः　　घ) लङ् लकारः

12) 'विद्वान्' इत्यस्य शब्दस्य पर्यायपदं किम्?

क) अविरतम्　　ख) मूर्खः

ग) अज्ञानी　　घ) कोविदः

13) 'प्रारभ्य' इत्यस्य शब्दस्य विलोमपदं किम्?

क) समाप्य　　ख) आरभ्य

ग) आरम्भ　　घ) प्रारम्भ

14) 'मृत्युम्' इत्यस्य शब्दस्य विलोमपदं किम्?

क) मरणम्　　ख) जीवनम्

ग) स्वर्गम्　　घ) विस्मृतम्

15) 'निःशेषविश्राणित' इत्यस्य शब्दस्य विशेष्यपदं किम्?

क) गुरुदक्षिणार्थी　　ख) कौत्सः

ग) फलप्रसूतिः　　घ) कोषजातम्

16) 'वार्तालापः' इत्यस्य शब्दस्य विशेषणपदं किम्?

क) संतुलितः　　ख) वर्षत्रयस्य

ग) ईश्वरः　　घ) रूक्षः

Downloaded from cclchapter.com